শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী পরাশর সংহিতাযাম্

# ॥ শ্রী আঞ্জনেযমঙ্গলাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী আঞ্জনেযমঙ্গলাষ্টকম্ ॥

কপিশ্রেষ্ঠায শূরায সুগ্রীৱপ্রিযমন্ত্রিণে।
জানকীশোকনাশায আঞ্জনেযায মঙ্গলম্॥ **1** ॥

মনোৱেগায উগ্রায কালনেমিৱিদারিণে।
লক্ষ্মণপ্রাণদাত্রে চ আঞ্জনেযায মঙ্গলম্॥ **2** ॥

মহাবলায শান্তায দুর্দণ্ডীবন্ধমোচন।
মৈরাৱণৱিনাশায আঞ্জনেযায মঙ্গলম্॥ **3** ॥

পর্ৱতাযুধহস্তায রক্ষঃকুলৱিনাশিনে।
শ্রীরামপাদভক্তায আঞ্জনেযায মঙ্গলম্॥ **4** ॥

ৱিরক্তায সুশীলায রুদ্রমূর্তিস্ৱরূপিণে।
ঋষিভিস্সেৱিতাযাস্তু আঞ্জনেযায মঙ্গলম্॥ **5** ॥

দীর্ঘৱালায কালায লঙ্কাপুরৱিদারিণে।
লঙ্কিণীদর্পনাশায আঞ্জনেযায মঙ্গলম্॥ **6** ॥

নমস্তে ব্রহ্মচর্যায নমস্তে ৱাযুনন্দন।
নমস্তে গানলোলায আঞ্জনেযায মঙ্গলম্॥ **7** ॥

প্রভাৱায সুরেশায শুভদায শুভাত্মনে।
ৱাযুপুত্রায ধীরায আঞ্জনেযায মঙ্গলম্॥ **8** ॥

আঞ্জনেযাষ্টকমিদং
যঃ পঠেৎসততং নরঃ।

সিধ্যন্তি সর্ৱকার্যাণি
    সর্ৱশত্রুৱিনাশনম্॥ **9** ॥

॥ শ্রী আঞ্জনেয মঙ্গলাষ্টকং সমাপ্তম্॥